श्रीगणेशायनमः ॥ ॥सूतउवाच॥ पुरायुधिष्ठिरोधीमान्धर्मराजोयुधांवरः॥ जरासंधवधार्थायराजसूयंप्रचक्रमे ॥१॥ कृष्णेनसहधर्मात्मा भीमार्जुनसमन्वितः॥ यज्ञशालांप्रकुर्वंतोनानारत्नोपशोभितां॥२॥ मुक्तालेप्यैस्समायुक्तांमहेंद्रालयसंनिभां॥ यज्ञार्थंभूपतीन्सर्वान्समाहूयप्रयत्नतः॥३॥ गांधारीतनयोराजासर्वान्नृपसूदनः॥ दुर्योधनइतिख्यातोसमागच्छमरवालयं॥४ दुर्योधनस्तुन्रपतिःप्रांगणेजलबुद्बुमान्॥ ऊर्ध्वकंचुकमापन्नोमार्गंगच्छन्नृणेःनृणेः॥५॥ स्मितवक्त्राश्चतेसर्वेद्रौपद्याद्यावरांगना॥ ततोगच्छन्महीरानोजळ

मध्येपपातसः॥६॥ ततःसर्वेनृपाश्चैवऋषयश्चतपोधनाः॥ द्रौपद्यादिस्त्रियाःसर्वास्मितवक्त्राःसुलोचनाः॥७॥ माहाराजाधिराजोसौ महाक्रोधसमन्वितः॥ विनिर्गत्यस्वकंराज्यं पुंमातुळेनस्वकंनृप॥ ८॥ तस्मिन्काळेतुशकुनिःश्लोकांचमधुरंवचः॥ राजन्प्राकृतवच्चिंतांयुक्तांचेतयसेनृपते॥९॥ सुंचसुंचमहाराषंघुरतःकार्यमस्तिच॥ द्यूतेपक्रमणेनैवसर्वंराज्यमवाप्स्यसि॥१०॥ तस्माद्गच्छनृपश्रेष्ठराजेंद्रधर्मस्यसदनंप्रति॥ तथेत्युक्त्वामहाराजासमागच्छमरवालयं॥११॥ विनिर्गत्यमरवंसर्वेनृपाःसर्वेस्वकंपुरं॥ ततोदुर्योधनोराजासमागत्यस्वमालयं॥ गजाश्व

 आनीयपांडुपुत्रांश्चधर्मंभीमार्जुनान्नृपान्॥ द्यूतारंभकरोतिस्मा

द्राज्यंसर्वंस्वराष्ट्रकं ॥१३॥ द्यूतेनविजिताःसर्वेपांडवावीतकल्मषाः॥
ततोरण्यांतरेगत्वावर्तंतेवनचारिणः॥१४॥ सूतउवाच॥अरण्ये
वर्तमानास्तेपांडवाःस्वकर्षिताः॥ कृष्णंदृष्ट्वामहात्मानंप्रणि
पत्ययथाक्रमं॥१५॥ युधिष्ठिरउवाच॥अहंदुःखाग्निसंतप्तो
भ्रातृभिःपरिवारितः॥कथंमुक्तिर्नदास्माकंमनंतदुःखसागरात्॥
१६॥ कथयस्वाद्यमेकृष्णसर्वपापप्रनाशनं॥व्रतंदानंतपस्वी
र्यंयत्कृत्वालभतेश्रियं॥१७॥ श्रीकृष्णउवाच॥अनंतव्रतमप्यन्य
त्सर्वपापप्रनाशनं॥सर्वकामप्रदंनृणांस्त्रीणांचैवयुधिष्ठिर॥
॥१८॥ युधिष्ठिरउवाच॥देवकेनविधानेनव्रतमेतदुदीरितं॥ ॥२॥

एतद्विस्तरतःसर्वंवक्तुमर्हसिमाधव॥१९॥ श्रीकृष्णउवाच॥शृणुकृष्णे
चतुर्दश्यांमासिप्राह्यदेभुभे॥तस्यानुष्ठानमात्रेणसर्वपापैः
प्रमुच्यते॥२०॥ युधिष्ठिरउवाच॥कृष्णःकोयंत्वयाख्यातोया
नंतइतिविश्रुतः॥कर्कोटकःकिंनागोवाकिंरूपलक्षकःस्मृतः॥२१
परमात्माथवानंतउताहोबलउच्यते॥कएषोनंतसंज्ञोहितथ्यंब्रू
हिचकेशव॥२२॥ श्रीकृष्णउवाच॥अनंतइत्यहंपार्थममरूपंनि
बोधय॥आदित्यरथवेगेनयःकाव्यउपपद्यते॥२३॥कलाका
ष्ठादिरूपेणदिनरात्रिशरीरवान्॥षड्भिर्मासस्तुवर्षाणि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

युगकल्पव्यवस्थितिः॥२४॥योयंकालोमयाख्यातोयोनंतइतिविश्रुतः॥
सोहंकालोवतीर्णोहंस्मिन्भुवोभारावतारणः॥२५॥दानवानांविनाशा
यसाधूनांपालणायच॥मांविद्धिचमहापार्थरुद्रंविद्धिहरंशिवं
॥२६॥आत्मानंभास्करंरोषंसर्वव्यापिनमीश्वरं॥विश्वरूपंम
हाकायंसृष्टिसंहारकारकं॥२७॥प्रत्ययार्थंमहापार्थममरू
पंनिदर्शितं॥पूर्वमेवमहाबाहोयोगीध्येयमनुत्तमं॥२८॥विश्व
रूपमनंतंचयास्मान्नेक्ष्यतुदृश्यते॥वसवोष्टौद्वादशादित्या
रुद्राएकादशानघः॥२९॥सप्तर्षयःसमुद्राश्चपर्वताःसरिता
द्रुमाः॥नक्षत्राणिदिशोभूमिःपातालंभूर्भुवादिकं॥३०॥मा ३

कुरुषात्रसंदेहंसोहंपार्थनसंशयः॥युधिष्ठिरउवाच॥अनंतव्रतमाहा
त्म्यंविधिंब्रूहिविदांवर॥३१॥किंपुण्यंकिंफलंतस्यानुष्ठानवतोनृणां॥
केनचादोपुराचीर्णमेत्यैकेनप्रकाशितं॥३२॥एतत्सर्वंसविस्तार्यब्रूह्य
नंतंव्रतंहरेः॥श्रीकृष्णउवाच॥आसीत्पुराकृतयुगेसुमंतोनामवैद्विजः॥व
सिष्ठगोत्रजातस्यनाम्नारूपांचभृतगोःसुतां॥दीक्षानामोपयेमेतांवेदोक्तवि
धिनाततः॥३४॥तस्याःकालेनसंजातादुहितानंतलक्षणा॥शीलानाम
सुशीलासावर्धतीपितृवेश्मनि॥३५॥माताचतस्याःकालेनज्वरदाह
नपीडिता॥विननाशानदीतीरंप्रेताःस्वर्गंपुरंययौ॥३६॥सुमंतोपि
ततोन्यावेधर्मपुंसःसुतांपुनः॥उपयेमेविधानेनकर्कशानामना

मतः॥३७॥दुःशीलांकर्कशांचंडीं नित्यंकलहकारिणीं॥सापिशीलापि
तुर्गेहेगृहार्चनरताभवो॥३८॥कुड्यस्तंभगृहद्वारदेहलीतोरणादिषु॥
चातुरंगकवर्णैश्चनीलपीतैःसितासितैः॥३९॥स्वस्तिकैःशंखपद्मैश्च
अर्चयंतीपुनःपुनः॥पित्रादृष्टासुमंतेनस्त्रीचिन्हेयौवनास्थिता॥४०॥
कस्मैदेयामयाकन्याविचार्यायंसुदुःखितः॥एतस्मिन्नंतरेकाळेआ
गतोमुनिसत्तमः॥४१॥कन्यार्थमागतोविप्रोकौंडिण्याऋषिसत्त
मः॥पितादत्तोमुनींद्रायकौंडिण्यायशुभेदिने॥४२॥गृह्यानंदविधि
नाविवाहमकरोत्तदा॥मंगळानांविनिर्घोषतत्रकुर्वंतियोषितः॥४३॥
ब्राह्मणावेदघोषंचजयघोषंचवंदिनः॥निर्वर्त्यैद्वाहिकंकर्मप्रोक्त ४

वान्कर्कशांछिन्नः॥४४॥किंचिद्दायादिकंदेयंजामातुःपरितोषकं॥तच्छु
त्वाकर्कशाकुद्धाप्रोत्सार्यगृहमंडनं॥४५॥पेटायांस्वस्तिकंबध्वाप्रा
हुणागम्यतामिति॥भोज्यावशिष्टचूर्णंनपाथेयमकरोत्तदा॥४६॥
कौंडिण्यापिविवाहेनपथिगच्छन्सुशोभने॥रथेसुशीलयासादा
यनवोढांगोरथेनच॥४७॥मध्यान्हेभोज्यवेळायांसमुत्तार्यसरि
त्तटे॥ददर्शशीलासास्त्रीणांसमूहंरक्तवाससां॥४८॥चतुर्दशयाम
र्चयंतंश्रीअनंतंपथकृत्पथक्॥उपगम्यत्रानेःशीलांपप्रच्छस्त्रीकदं
बकं॥४९॥आर्याःकिमत्तन्मेब्रूहिकिंनामव्रतमीदृशं॥ताश्चुर्योषि
ताःसर्वाअनंतानामविश्रुताः॥५०॥साब्रवीदहमध्येतत्करिष्येव्रतमु
त्तमं॥विधानंकीदृशंतस्यकिंदानंकस्यपूजनं॥५१॥स्त्रियाऊचुः॥

स्नात्वानंतसमभ्यर्च्यमंडलेगंधपुष्पकौ॥ धूपदीपैश्चनैवेद्यैःपीतवस्त्रैः
सुशोभितैः॥५२॥ शीलेप्रस्थस्यपक्वान्नंघृतमिश्रितं॥अर्धंवि
त्तायदातव्यमर्धमात्मनियोजयेत्॥५३॥ कर्तव्यंचनदीतीरेकथांश्रु
त्वानदीहरेरिमां॥तस्याग्रतोदृढंसूत्रंकुंकुमाक्तंसुदोरकं॥५४॥
चतुर्दशाग्रंथियुक्तंवामेकरतलेन्यसेत्॥वर्षेवर्षेनवंसूत्रंनववर्षा
णिपंचच॥५५॥अनंतसंसारमहासमुद्रमग्नंसमभ्युद्धरवासुदेव॥
अनंतरूपेविनियोजयस्वअनंतसूत्रायनमोनमस्ते॥५६॥संसारगह
रगुहासुसुखंविहर्तुंवांछंतियेकुक्कुलोद्भवशुद्धसत्वाः॥संपूज्यचक्रि
भुवनेशमनंतमाद्यंबध्नंतिदक्षिणकरेवरदारकंते॥५७॥ध्यात्वाना

रायणंदेवंमनंतंविश्वरूपिणं॥आचार्यायप्रदातव्यंदक्षिणाभक्तिपूर्व
कं॥५८॥यावद्वर्षंसमाप्तंतावध्यायेन्नरोत्तम॥वर्षेचतुर्दशेपूर्णे
कुर्याद्व्यापनंततः॥५९॥दशाढ्यानुरूपेणमध्येकृत्वाविशेषतः
॥उद्यापनविनाराजन्नव्रतपूर्तिर्नलभ्यते॥६०॥उद्यापनंप्रकुर्वीत
स्वर्णसूत्रंतदाचरेत्॥मंत्रेणदोरकंबध्वाप्रोक्तव्यंस्वस्थमानसैः॥६१॥
पुत्रकांचांतेव्रजेदस्मिन्नक्षद्वयंप्रोक्तंव्रतं॥सापिप्रकुर्वीताव्रतंचक्रे
शीलाबध्वासुदोरकं॥६२॥पायसंशर्करंविप्रायदत्वाभुक्तवतथैवच॥
पुनर्जगामसास्थाद्वागोरत्नेनसमंप्रियं॥६३॥भर्त्रासहैवरत्नकैःप्र
त्यक्षलक्षणादरैःतैः॥तेनानंतव्रतेनास्यांबकुगोधनसंकुलं॥६४॥

गृहाश्रमंश्रिया युक्तंधनधान्यादिसंपदा॥ अकुलंव्याकुलंरम्यंस
र्वत्रातिथिपूजनं॥६५॥ सापिमाणिक्यकांतीक्षिर्मुक्ताहारैर्विभूषि
ता॥दिव्यांगवस्त्रसंछिन्नासावित्रीप्रतिमाबभौ॥६६॥कदाचिदुप
विष्टेनकौंडिन्येनदुरात्मना॥शीलायाहस्तमूलेषुदृष्ट्वाबद्धंसुदोर
कं॥६७॥किमिदंदोरकंशीलेममवध्यायकल्पितं॥कयात्वंवंचि
ताभूत्किंयाबद्धंसुदोरकं॥६८॥शीलाउवाच॥यस्यप्रसादात्सं
जातंधनधान्यादिसंपदा॥मुक्तिमुक्तिप्रदंतस्यअनंताख्यमहाव्र
तं॥६९॥कोनंतइतिजल्पेतांब्रुवतातेनपांडव॥शीलायांहस्तमूले
त्रोदितंक्षिपितंरुषा॥७०॥क्षिप्त्वाज्वालाकुलेवन्हौहाहाकृत्वा

प्रधावति॥शीलागृहीत्वातत्सूत्रंक्षीरमध्येविनिक्षिपेत्॥७१॥तेनकर्म
विपाकेनतस्यसाश्रीर्विनाक्षयंगता॥गोधनंतस्करैर्नीतंगृहं
दग्धंधनंगतं॥७२॥यतएवागतंगेहंतथैवपुनर्गतं॥स्वजनैःक
लहोनित्यंमित्रैर्निर्वचनंतथा॥७३॥अनंतक्षोभदोषेणदारिद्र्यंपति
तंगृहे॥नकश्चिद्वदतेलोकेतेनसार्धंयुधिष्ठिर॥७४॥ततोऽगा
मकौंडण्योनिर्वेदादूहनंवनं॥विकलःप्रययौपार्थसोरण्येऽत
नवर्जितं॥७५॥मनसाध्यायचानंतंकक्षमामीतिकेशवं॥
व्रतंनिरशनंदेवअलचर्यंजपंहरिं॥७६॥तत्रापश्यन्महाच्यूतं
फलितंपुष्पितंतथा॥वर्जितंपक्षिसंघातैःकीटकैर्भ्रमरैःस्तथा॥

७ तमपृच्छद्द्विजोनंतकश्चिद्दृष्टोमहातपो॥इत्युक्तःसोपिवैवानंनानंतो
वेद्म्यहंद्विज॥७८॥एवंनिराकृतस्तेनगोदद्दर्शसवत्सकां॥तृणमध्येप्र
धावंतिमित्स्वेतश्चपांडव॥७९॥सोब्रवीद्वेनुकेब्रूहियद्यनंतंत्वयेक्षितः॥गोरक्षुवाचकौंडिण्यानानंतोवेद्म्यहंद्विज॥८०॥ततोब्रजन्ददर्शाग्रेगोवृषंशाड्वलेस्थितं॥दृष्ट्वापप्रच्छगोस्वामिन्यद्यनंतस्त्वयेक्षितः॥८१॥गोवृषस्तमुवाचाथोनानंतोवीक्षितोमया॥ततोब्रजन्ददर्शाग्रेरम्यंपुष्करिणीद्वयं॥८२॥अन्योन्यजलकल्लोलंवीचिपर्यंतसंकुलं॥क्वनंकुमुदकल्लोलैरुदारैःकुमुदोत्पलमंडितैः॥८३विहीनंपद्ममरैर्हंसैःश्वक्रवाकैश्चसामरैः॥तमपृच्छद्द्विजोनंतउभा ७

क्ष्यांकिंनलक्षितः॥८४॥ततोब्रजन्ददर्शाग्रेगर्दभंकुंजरंतथा॥तावप्युक्तौद्विजेंद्रायऊभाभ्यांकिंनलक्षितः॥८५॥ताभ्यांवीक्षितोनंततच्छ्रुत्वानिघसादह॥तस्मिन्क्षीणेसुनिर्विण्णोकौंडिण्योब्रह्मणोन्नमः॥८६॥कृपयानंतदेवोपिप्रत्यक्षसमजायत॥दृष्ट्वाब्रह्मणरूपेणइतएहीत्युवाचतं॥८७॥प्रेक्षाइत्यास्वगृह्यंगृह्यत्वादक्षिणेकरे॥स्वांपुरींदर्शयामासदिव्यनारीनरैर्युतां॥८८॥तस्यांनिविष्टमात्मानंवरासंहासनेशुभे॥पार्श्वयोःशंखचक्रायगदागरुडशोभितं॥८९॥दर्शयामासविप्रायपूर्वोक्तंविश्वरूपिणं॥विष्णुतिभिःसमायुक्तंमन्वितंरमयासह॥९००॥तंदृष्ट्वाथद्विजोनंतमुवाचकृपयामुदा॥पापोहंपापकर्महि

पापात्मापापसंभवः॥त्राहिमांपुंडरीकाक्षत्रारणागतवत्सळ॥१०१॥अद्य
मेसफळंजन्मजीवितंचसुजीवितं॥तवपादयुगांभोजमन्मूर्धोत्तम
रायते॥२॥तच्छ्रुत्वानंतदेवोपिददौतस्मैवरत्रयं॥दारिद्र्यनाश
नंधर्म्मनिष्पुलोकंचत्रास्थतं॥३॥प्रतिगृह्यद्विजोप्याहभगवान्यो
मयेक्षितः॥कच्यूतःकोवृक्ष कागोकिंचपुष्करिणीद्वयं॥४॥कःख
रःकुंजरस्यैवतथ्यंमेब्रूहिकेशव॥श्रीअनंतउवाच॥सच्यूतवृक्षोवि
प्रोसोसुविद्वान्वेदगर्वितः॥५॥आसीच्छास्त्रेणनप्रादाच्छिष्यप्य
स्तरुतांगतः॥सागोर्वसुंधरादृष्टानिष्फळाब्राह्मणायवै॥६॥सागो
वृषोवृषोलोपंस्वयंकृतध्वनामतः॥धर्माधर्मव्यवस्थानंतश्चपु

ष्करिणीद्वयं॥खरःक्रोधस्त्वयादृष्टःकुंजरोमदएवच॥ब्राह्मणोसा
वनंतोक्तंगुह्यसंसारगर्करं॥८॥इत्युक्तेमयासर्वंविप्रगच्छपुनर्गृहं
॥चरानंतव्रतंतत्रनववर्षाण्यपिपंचच॥९॥ततस्तुष्टःप्रदास्यामिनक्षे
त्रस्थानमुत्तमं॥कल्पस्थायीचसंप्राप्तोदक्पथंह्यपिसाध्वळः॥
१०॥इहभुक्त्वातुविपुळान्सर्वान्कामान्यथेप्सितान्॥पुत्रपौत्रैः
परिवृतोततोलोकमवाप्स्यसि॥११॥इतिदत्वावरंदेवो तत्रैवांतरधी
यत॥कौंडिण्योपिगृहंगत्वाचचारव्रतमुत्तमं॥१२॥शीलयासहधर्मि
ष्ठामाप्तुंत्कामोगान्यथेप्सिताच्च॥अंतेजगामतत्सर्वंनक्षत्रंचपुनर्व
सु॥१३॥अनंतव्रतधर्मेणसम्यक्कृत्वेहनिष्पांडव॥कुबेरेणपुरा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

चीर्णहरिश्चंद्रेणावाप्तं ॥१४॥सागरेणादिलीपेनव्रतंचीर्णंपुराकृ
तं॥अनंतव्रतधर्मेणाप्तंराज्यमकंटकं ॥१५॥एतन्नेकथितंदे
वव्रतानामुत्तमव्रतं॥यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः॥१६
यइदंशृणुयान्नित्यंश्रद्धावान्सुसमाहितः॥सिध्यंतिसर्वका
र्याणितस्यामोक्षवाप्नुयात्॥१७॥एतच्छ्रुण्वंतिकथनंपठ्यमानंनरो
त्तमः॥तेसर्वपापनिर्मुक्तायास्यंतिपरमांगतिं॥१८॥ श्रीः ॥
॥ ॥ इतिभविष्योत्तरपुराणेश्रीअनंतव्रतकथापुस्तकंसमा
प्तिमगमत् ॥ ॥ श्रीरस्तु॥ शके १६८४ चित्रभानोभाद्रशु
द्धत्रयोदश्यांलिखितमिदं॥ ॥ श्री॥ श्रीः ॥ श्रीः॥